# संस्कृत-वार्ता:

**दिनाङ्क :- 08.09.2024** **प्रात: - 06: 55**

**अथ वार्ता:**

**अमितशाह:/जम्मू-कश्मीर:**

भाजपेतिदलस्य वरिष्ठनेता केन्द्रीयगृहमन्त्री च अमितशाह: ह्य: उक्तवान् यत् यावत् शान्ति: न स्थापयिष्यते तावत् पाकिस्तानेन सह संवाद: न भविष्यति। स: समाश्वासितवान् यत् विधानसभा-निर्वाचनस्य अनन्तरं जम्मूकश्मीरप्रदेशाय राज्यपदं प्रदास्यते। जम्मूनगरे एकं सार्वजनिकोपवेशनं सम्बोधयन् श्रीशाह: स्पष्टीकृतवान् यत् जम्मूकश्मीरे आगामि-विधानसभा-निर्वाचनम् ऐतिह्यत्वेन अस्ति, यतो हि मोदिप्रशासनद्वारा सप्तत्यधिक-त्रिशतानुच्छेदस्य अपाकरणानन्तरं प्रथमं वारं संविधानस्य अन्तर्गतं भवति इदं निर्वाचनम्। ध्यानास्पदं वर्तते यत् श्रीशाह: निर्वाचनप्रचाराय जम्मूकश्मीरस्य द्विदिवसीय-यात्रायामस्ति।

**नड्डा/बिहारम्**

केन्द्रीयस्वास्थ्यमन्त्री जे.पी.नड्डा ह्य: पटनानगरे अत्याधुनिकस्य पटना-चिकित्सकीय-महाविद्यालयस्य चिकित्सालयस्य च निर्माणकार्याणि समीक्षितवान्। अयं हि विश्वस्य द्वितीयस्य बृहत्तमस्य चिकित्सालयस्य रूपेण विकसति। केन्द्रप्रशासनमपि अत्याधुनिक-सौविध्यै: सह चतुष्पञ्चाशत्-शय्यायुतस्य चिकित्सालस्य विकासाय बिहारप्रदेशाय साहाय्यं प्रददाति। एतदतिरिच्य श्रीनड्डा दरभङ्गा-मुजफ्फरपुरयो: द्वयो: अत्याधुनिक-सौविध्युतयो: चिकित्सालयोरपि उद्घाटनं विधास्यति।

**प्रधानमन्त्री/शिक्षका:**

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् शिक्षका: राष्ट्राय विशिष्टसेवां प्रददति अपि च विकसितभारताय युवनिर्माणस्य कर्त्तव्यं तेषां हस्ते एव निहितमस्ति। शुक्रवासरे नवदिल्ल्यां निजावासे राष्ट्रिय-शिक्षक-पुरस्कार-प्राप्तै: शिक्षकै: सह सम्भाषमाण: श्रीमोदी उक्तवान् यत् विकसितभारताय योग्यनागरिकाणां यूनाञ्च निर्माणाय सर्वेषां सहयोग: अपेक्षितो वर्तते। श्रीमोदिना निगदितं यत् शिक्षका: वैविध्यम् अवलोकयितुम् अवलोकनाय विद्यार्थिन: पर्यटनाय आनयेयु:। प्रधानमन्त्री शिक्षकान् निवेदितवान् यत् ते निजच्छात्रान् प्रचल्यमानायां 'देखो अपना देश-पीपल्स् च्वॉइस्' इत्येतस्यां प्रतियोगितायां भागग्रहणाय प्रेरयन्तु।

**तेलङ्गाना/वृष्टि:**

तेलङ्गाना-सर्वकारेण राज्यस्य त्रयस्त्रिंशत्सु एकोनत्रिंशज्जनपदा: जलौघप्रभावित्वेन घोषिता:। जलौघप्रभावितेभ्य: जनपदेभ्य: त्रिकोटि-रूप्यकाणामपि सहायता राज्यसर्वकारेण समुद्घोषिता। इत: पूर्वमपि चत्वार: जनपदा: जलौघप्रभावितत्वेन समुद्घोषिता: आसन्। जलौघप्रभावित-क्षेत्रेषु आपदुद्धार-कार्याणि जायमानानि सन्ति। रेवंथरेड्डी इत्यमुना हैदराबादे एकम् उच्चस्तरीय-समीक्षोपवेशनमपि विहितम्। उपवेशनानन्तरं वार्ताहरै: सह संवादकाले राज्यस्य मुख्यसचिवपदारूढया शान्ता-कुमारी इत्यनया

प्रोक्तं यत् गतमासस्य एकत्रिंशद्दिनाङ्कात् आरभ्य अस्य मासस्य त्रिदिनाङ्कं यावत् समङ्कित-वृष्टेः आधारेण इयं घोषणा कृता। तया उक्तं यत् राज्ये वृष्टिकारणात् मृतकानां सङ्ख्या संवर्ध्य एकोनत्रिंशत् जाता।

## अपराजिता-महिला-बाल-विधि-संशोधनम्

पश्चिमबङ्गालस्य राज्यपालः सी.वी.आनन्दबोसः पश्चिमबङ्गालस्य आपराधिक-विधि-संशोधकं चतुर्विंशत्यधिक-द्विसहस्र-तमाब्दीयम् 'अपराजिता-महिला-बाल-विधेयकं' राष्ट्रपतये द्रौपदी-मुर्मू इत्यस्यै प्रेषितवान्, यस्मिन् अनेकाः न्यूनताः सन्ति इति सूच्यते। गतमासस्य नवमे दिनाङ्के कोलकातायाः आर्.जी.कर-चिकित्सालये एकस्याः चिकित्सिकायाः बलात्कारस्य हत्यायाः च अनन्तरं राज्य-विधानसभया एतत् विधेयकं पारितम्। यदि बलात्कार-परिणामेन पीडितायाः मृत्युः भवति तर्हि अपराधिभ्यः मृत्युदण्ड-विधानं स्यात् इति विधेयकं प्रतिपादयति।

## वैष्णवः/जापानदेशः

केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः प्रतिपादितवान् यत् टोक्योनगरे जापान-एक्सटरनल्-ट्रेड्-ऑर्गनाइजेशन्-इत्येतस्याः संस्थायाः अध्यक्षेण सुसुमु-**काटाओका** इत्यमुना साकं गुणवत्तायुतम् उपवेशनं सञ्जातम्। एकस्मिन् सामाजिक-सञ्चार-सन्देश-पटले श्रीवैष्णवः निगदितवान् यत् उपवेशनमिदं द्विपक्षीय-व्यापार-निवेशार्थव्यवस्थापूरक-विषयेषु आधारितमासीत्।

**।। इति वार्ताः।।**